द्वितीयाविभक्तिः – कर्मपदम् =

किम् (कम् काम्) + करोति (+ अन्यसकर्मकधातवः) ? कुत्र + गच्छति (+ अन्यगमनक्रियापदानि) - एतयोः उत्तराणि ।

द्वितीयाविभक्ति : – Accusative Case – Object, goal of a verb in motion									
	पुंलिङ्गम्			स्त्रीलिङ्गम्			नपुंसकलिङ्गम्		
अ	रामम्	रामौ	रामान्				वनम्	वने	वनानि
आ				रमाम्	रमे	रमाः			
इ	हरिम्	हरी	हरीन्	मतिम्	मती	मतीः	दधि	दधिनी	दधीनि
ई				गौरीम्	गौर्यौ	गौरीः			
उ	गुरुम्	गुरू	गुरून्	धेनुम्	धेनू	धेनूः	मधु	मधुनी	मधूनि
ऊ				वधूम्	वध्वौ	वधूः			
ऋ	कर्तारम्	कर्तारौ	कर्तॄन्	स्वसारम्	स्वसारौ	स्वसॄन्			
ऋ	पितरम्	पितरौ	पितॄन्	मातरम्	मातरौ	मातॄः			
तद्	तम्	तौ	तान्	ताम्	ते	ताः	तत्	ते	तानि
किम्	कम्	कौ	कान्	काम्	के	काः	किम्	के	कानि
भवत्(पुं)	भवन्तम्	भवन्तौ	भवतः	भवतीम्	भवत्यौ	भवतीः			
सर्व	सर्वम्	सर्वौ	सर्वान्	सर्वाम्	सर्वे	सर्वाः	सर्वम्	सर्वे	सर्वाणि
इदम्	इमम्	इमौ	इमान्	इमाम्	इमे	इमाः	इदम्	इमे	इमानि
अस्मद्	माम्/मा	आवाम्//नौ	अस्मान्/नः						
युष्मद्	त्वाम्/त्वा	युवाम्/वाम्	युष्मान्/वः						

द्वितीयाविभक्तिः – कर्मपदम् - Accusative Case – used with सकर्मक-धातवः

1. **कर्मपदम्** – Object - **किम्** नयति ? चषकं नयति । **कं** पश्यति ? बालकं पश्यति ।
2. **कर्मपदम्** – Destination - **कुत्र गच्छति / आगच्छति / नयति / आनयति** ? आपणं गच्छति ।
3. **'विना'** इत्यस्य शब्दस्य योगे 'उपपदद्वितीया भवति' (तृतीया, पञ्चमी-(विना अर्थे-ऋते) अपि) । रामं विना न गच्छति
4. **त्त्वान्तम्, ल्यबन्तम्, तुमुनन्तम्** पदानां योगे द्वितीयाविभक्तिः भवति - आपणं गत्वा, आगत्य, गन्तुम्...
5. **परितः, उभयतः** इतिशब्दयोः योगे 'उपपदद्वितीया भवति' - गृहं परितः उद्यानम् अस्ति । मार्गं उभयतः वृक्षाः सन्ति
6. **द्विकर्मकं वाक्यम्** - छात्रः **अध्यापकं प्रश्नं** पृच्छति । वदति, पृच्छति, प्रार्थयति, आनयति च चत्वारः धातवः एव व्यवहारे बहुधा पश्यामः ।

---

1. १. छात्रः (पाठः) _____ (पाठाः) _____ पठति । कम् ? तम् कान् ? तान्
   २. सीता (माला) _____ (मालाः) _____धरति | काम् ? ____ काः ? _____
   ३. अधिकारिणी (युवती) _____ (युवत्यः) _____ वदति । काम् ? ____ काः ? _____
   ४. गर्दभः (वस्त्रम्) _____ (वस्त्राणी) _____वहति। किम् ? ____ कानि ? _____

५. भवती किमर्थं (अहम्) _____ पश्यति ?

६. अहं (भवान्) _____ एव आह्वयामि।

७. सः (भवती) _____ आलिङ्गणम् करोति।

2. १. छात्राः (विद्यालयः) _____ आगच्छन्ति।

२. अध्यापकः (पाठशाला) _____ गच्छति।

३. वयं (प्रदर्शिन्यः) _____ गच्छामः ।

४. भक्तः (मन्दिराणि) _____ गच्छति।

3. १. छात्राः (विद्यालयाः) _____ विना कथं पठन्ति ?

२. अर्चकाः (मालाः) _____ विना अलङ्कारं सम्यक् न कुर्वन्ति ।

३. (नद्यः) _____ विना जीवनं कठिनम् ।

४. (जलम्) _____ विना मीनाः न जीवन्ति ।

4. १. छात्रः (पाठः) _____ पठित्वा अर्थं जानाति ।

२. छात्रः (अर्थः) _____ पाठं पठति ।

३. बालिका (सरस्वतीदेवी) _____ नमस्कृत्य विद्यालयं गच्छति ।

5. १. (द्वीपः / द्वीपम्) _____ परितः जलम् अस्ति ।

२. (सूर्यः) _____ परितः ग्रहाः सन्ति ।

३. (सस्यम्) _____ परितः मृगाः पिबन्ति ।

४. (युवती) _____ परितः युवकाः सन्ति ।

५. (शाटिकाः) _____ परितः महिलाः क्रीणार्थम् आगच्छन्ति ।

६. (मार्गः) _____ उभयतः वृक्षाः विद्युद्दीपस्थम्भाः च सन्ति ।

७. (नदी) _____ उभयतः ग्रामाः सन्ति ।

८. (अम्बा) _____ उभयतः तस्याः पुत्राः उपविशन्ति ।

९. (भवनम्) _____ उभयतः आपणाः सन्ति ।

6. १. मम मातामही (अहम्) _____ (रामायणकथा) _____ वदति / कथयति ।

२. छात्राः (अध्यापिका) _____ (प्रश्नाः / सन्देहाः) _____ पृच्छन्ति ।

३. भक्ताः विनयेन (देवः) _____ (पुत्री) _____ प्रार्थयति ।

४. बालकाः (लेखन्यः) _____ (पाठशाला) _____ नयन्ति ।

५. प्रजाः (महाराजः) _____ (क्लेशाः) निवेदयन्ति (कथयन्ति) ।

६. गुरुः (वयम्) _____ (मन्त्राः) _____ उपदिशति ।

७. अहम् (भवन्तः) _____ केचन (प्रश्नाः) _____ श्वः प्रक्ष्यामि ।

८. महिलाः प्रतिदिनं नदीतः (जलम्) _____ (गृहम्) _____ आनयति ।